एवं प्राप्तानि काष्ठानि सङ्गृह्य बद्ध्वा नीत्वा विक्रीतवान् वणिपुत्रः। तेन प्राप्तेन धनेन चणकान् क्रीत्वा उपस्करं योजयित्वा, शीतलजलेन सह काष्ठसङ्ग्रहीतृभ्यः कानिचन दिनानि दत्तवान्। एवं किञ्चित् धनं सङ्गृह्य तेन काष्ठानि क्रीत्वा गृहे सगृहीतवान्। तावता वृष्टिकालः आसन्नः। काष्ठस्य मूल्यं प्रवृद्धम्। अतः अधिकेन मूल्येन आत्मना सङ्गृहीतानि काष्ठानि विक्रीतवान् वणिपुत्रः। विक्रयणात् प्राप्तेन धनेन स्वकीयम् एकम् आपणम् आरब्धवान् सः।

सोभाग्यवशात् तेन वाणिज्यतः विशेषतः लाभः प्राप्तः। वणिपुत्रः वाणिज्यं विस्तारितवान्। एवम् अल्पे एव काले सः कश्चन महावणिक् जातः। केषुचित् एव वर्षेषु सः लक्षाधीशः जातः।

कदाचित् सः एकं सुवर्णमयं मूषकं कारयित्वा धनगुप्तस्य गृहं गतवान्। धनगुप्ताय तं सुवर्णमूषकं दत्त्वा—“श्रीमन्, भवता यत् मूलधनं दत्तं तत् वृद्धिसहितं प्रत्यर्पयन् अस्मि” इति उक्त्वा पूर्वतनघटनां विस्तरेण निवेदितवान्।

एतत्सर्वं श्रुत्वा धनगुप्तः नितरां सन्तुष्टः। तस्मै स्वस्य एकमात्रपुत्रीं दत्तवान् सः। विवाहसमये यौतकरूपेण सुवर्णमूषकः एव समर्पितः धनगुप्तेन।

संस्कृत चन्दमामा — जनवरी १९९१

चीनांशुकम्

द्वित्रसहस्रवर्षेभ्यः पूर्वं चीनादेशे कश्चन राजा आसीत्। तस्य पत्न्याः नाम चीलिंग्षी इति। सा परमसुन्दरी। विवाहसमये तस्याः वयः चतुर्दश वर्षाणि।

महाराज्ञी सर्वदा सन्तोषेण तिष्ठेत् इति महाराजस्य आशयः। अतः एव अन्तःपुरं रमणीयतया अलङ्कृतम् आसीत् तेन। अन्तःपुरं परितः परमरमणीयम् उद्यानं निर्मितम् आसीत्। तस्याः तोषणार्थं गायकाः नर्तकाश्चापि नियोजिताः आसन्।

एवं सकलसौभाग्यम् अस्ति चेदपि राज्ञ्याः मनः खिन्नम् एव तिष्ठति। तस्याः मुखे न हासः, व्यवहारे न उत्साहः। तत्र कारणम् अपि अस्ति। ऐदम्प्राथम्येन सा मातापितरौ बान्धवान् च परित्यज्य दूरे अदृष्टपूर्वे परिसरे तिष्ठन्ती अस्ति। अतः सा मातापितरौ, सखीः, जन्मगृहं च पुनः पुनः स्मरन्ती खेदेन निःश्वसिति।

राज्ञ्याः कान्तिरहितं मुखं पश्यतः महाराजस्य महती चिन्ता। तस्याः चिन्तायाः निवारणार्थं सः कदाचित् तया सह उद्यानं गतवान्। कंस्यचित् पिप्पलीवृक्षस्य अधः उपविश्य प्रीत्या तां पृष्टवान्—“देवि! का चिन्ता भवत्याः? किं स्वास्थ्यं सम्यक् नास्ति? काऽपि न्यूनता अनुभूयते वा अत्र?” इति।

तदा चीलिंग्षी उक्तवती—“स्वामिन्! अत्र न काऽपि न्यूनता। अस्वास्थ्यम् अपि नास्ति मम। किन्तु केनापि कारणेन मनसि उल्लासः एव न दृश्यते, तावदेव” इति।

तया सह किञ्चित्कालं स्थित्वा राजा मन्त्रिणां समीपं गत्वा आज्ञास्वरेण उक्तवान्—“महाराज्ञ्याः मनः उल्लसितं यथा स्यात् तथा कर्तुं कः उपायः इति आलोच्य मां निवेदयन्तु” इति।

महाराजस्य निर्गमनस्य अनंन्तरं परिचारिकाः चायपात्रम् आनीय तस्याः पुरतः स्थापितवत्यः। सम्प्रदायानुगुणं राज्ञी गायकेभ्यः नर्तकेभ्यः च चायपानीयं सज्जीकृत्य दत्तवती। अनन्तरं स्वनिमित्तम् अपि चषकमितं चायपानीयं सज्जीकृतवती।

तत्समये काचित् घटना प्रवृत्ता। वृक्षात् कश्चन कीटकोषः राज्ञ्याः चायचषके पतितः। पानीयबिन्दवः केचन राज्ञ्याः वस्त्रेषु अपि पतिताः। परिचारिकाः धावन्त्यः समीपम् आगतवत्यः।

“मम वस्त्रस्य किमपि न जातम्। पानीये किं पतितम् इति पश्यन्तु” इति उक्तवती राज्ञी।

परिचारिकाः चायपानीये पतितम् उन्नीय प्रदर्शितवत्यः। तन्तूनां पिण्डम् इव दृश्यते स्म तत्। राज्ञी तत् आसक्त्या दृष्टवती।

वस्तुतः प्रवृत्तं तु एवम्। पिप्पलीवृक्षस्य अधः उपविष्टवती आसीत् खलु सा? पिप्पलीवृक्षे कौशेयकीटानां कोषाः आसन्। तादृशः कश्चन कोषः अकस्मात् राज्ञ्याः पानीयपात्रे पतितः। उष्णताकारणतः कोषस्थाः तन्तवः स्पष्टतां गताः।

राज्ञी कुतूहलेन कोषस्य एकं तन्तुम् आकृष्टवती। सूक्ष्मः चाकचक्ययुक्तः च अस्ति सः। झटिति भग्नः अपि न भवति। एकस्मिन् कोषे एकः एव अखण्डः तन्तुः। राज्ञी परिचारिकां काञ्चित् उक्तवती "यत् शलाकायाम् एतं तन्तुं वेष्टयतु" इति। परिचारिका तथैव कृतवती।

'सुन्दरः दृढतरः च तन्तुः एषः। वस्त्रनिर्माणार्थं यावत् आवश्यकं तावत् तन्तुः यदि लभ्येत, तेन यदि वस्त्रं निर्मीयेत तर्हि कथं भवेत्? रमणीयं वस्त्रं सिद्धं स्यात्' इति आलोचितवती राज्ञी उत्साहेन सखीः आज्ञापितवती—"भवत्यः वृक्षे स्थितान् एतादृशान् कोषान् सङ्गृह्य उष्णे चायपानीये पातयन्तु" इति।

तत्क्षणे एव सर्वाः कौशेयकीटानां कोषाणां सङ्ग्रहणे उद्युक्ताः जाताः। पूर्वं राज्ञी क्षणं युगमिव भावयति स्म। इदानीं तु तस्याः युगं क्षणायते। महता उत्साहेन व्यवहरन्ती सा परिचारिकाणां कार्यं परिशीलयन्ती अस्ति। मायङ्कालाभ्यन्तरे तन्तूनां केचन समूहाः सिद्धाः। राज्ञी तक्षकान् आहूय आज्ञापितवती—"प्रातःकालाभ्यन्तरे उत्तमः वेमा निर्मातव्यः भवद्भिः। किन्तु एवं निर्माणं रहसि प्रचलेत्" इति।

अनन्तरदिने राजा मन्त्रिणः आहूय पृष्टवान्—"राज्ञ्याः तोषणार्थं भवद्भिः कः उपायः चिन्तितः?" इति।

"प्रभो, सुन्दरी काचित् मयूरी उद्याने स्थापिता चेत् मर्याः लास्यं पश्यन्ती राज्ञी सन्तोषम् अनुभवेत्" इति सूचितवान् कश्चन मन्त्री।

एषः उपायः राज्ञे न तथा अरोचत। सः अममाधानेन मन्त्रिणः दृष्टवान्। मन्त्रिणः राज्ञः आशयं जानन्तः लज्जया शिरः अवनमय्य ततः निर्गतवन्तः। 'राज्ञीम् अत्र आनयन्तु' इति भटान् आज्ञापितवान् राजा।

अन्तःप्रं गत्वा प्रत्यागतः कश्चन भटः गजानं निवेदितवान्—"प्रभो, राज्ञी प्रकोष्ठात् इतोऽपि बहिः न आगता इति श्रयते" इति।

"सूर्योदयः जातः चेर्दापि राज्ञी प्रकोष्ठात् बहिः न आगता? किं मा अस्वस्था, उत नितरां खिन्ना?" इति स्वगतं वदन राजा उद्वेगेन अन्तःपुरं गतवान्। प्रकोष्ठे यत् प्रचलति तत् दृष्ट्वा राजा आश्चर्यचकितः!

'या ह्यः चिन्तामागरे निमग्ना सती अश्रूणि स्रावयन्ती आसीत् सा राज्ञी किम् एषा एव? मुन्दरैः तन्तुभिः परमरमणीय वस्त्रं वयन्ती अस्ति एषा! श्रमम् अपि अविगणय्य कार्यरता दृश्यते। मुखे अपूर्वः हामः उत्साहः च' इति आलोचयन् राजा राज्याः कार्यं निर्निमेषं पश्यन् स्थितवान्।

राज्ञः आगमनं ज्ञात्वा राज्ञी शिरः उन्नीय दृष्टवती। तस्याः नेत्रे आनन्दातिरेकेण प्रकाशेते। तृप्तिसूचकः मन्दहासः मुखे विलसति।

"प्रभो, अद्यावधि चिन्तालीना अहं भवन्तं नितरां खेदितवती स्याम्। तस्य दोषस्य निवारणार्थम् एकम् अपूर्वं वस्त्रं प्रवाय अर्पयितुम् उद्युक्ता अस्मि। मम व्यवहारात् कुपितः तु नास्ति खलु भवान्?" इति मधुरस्वरेण पृष्टवती राज्ञी।

चोलवस्त्रं, क्रीतम्' इति असत्यम् उक्तवती। अल्पेषु विषयेषु एव स्वभावनिर्णयः भवति। मम कथनानुगुणं व्यवहरता भवता बहुधा उपकृतम्। तदस्तु, असत्यं वदन्ती कमला एकं चोलवस्त्रं स्ववशे स्थापितवती। अपरं भवता सरलायै उपायनीकृतम्। तयोः चोलवस्त्रयोः मूल्यं कियत् इति वदतु। अहं दास्यामि" इति।

तदा वरदराजः—"रे, किं वदति भवान्? विश्वनाथः ममापि पुत्रः इव। तस्य निमित्तं वध्वाः अन्वेषणे अल्पः व्ययः कृतः स्यात् मया। तत् धनम् अहं भवत्तः स्वीकुर्यां वा? तादृशः कृपणः वणिक् न अहम्। विवाहमुहूर्तम् अचिरात् एव निश्चित्य, विवाहदिने भोजनसमये मधुरभक्ष्यद्वयम् अधिकतया स्थापयतु मम पत्रे। तावता अलम्" इति हसन् उक्तवान्।

अनन्तरम् अल्पे एव काले शुभे मुहूर्ते सरला-विश्वनाथयोः विवाहः यथाविधि सवैभवं प्रवृत्तः।

सुवर्णमूषकः

[पञ्चविंशतिवर्षेभ्यः पूर्वं चन्दमामायां प्रकाशिता कथा]

प्रतिष्ठाननामके देशे आदर्शपुरं नाम नगरम्। तस्मिन् नगरे माधवी नाम विधवा निवसति स्म। यदा तस्याः पतिः मृतः आसीत् तदा दायादाः तस्याः सम्पत्तिं वशीकृतवन्तः आसन्। पत्युः मरणसमये सा गर्भवती आसीत्। नवमे मासे सा पुत्रं प्रसूतवती। महता कष्टेन पुत्रं पोषितवती च। इदानीं पुत्रः प्राप्तवयस्कः अस्ति।

कदाचित् माधवी पुत्रम् आहूय उक्तवती— "वत्स, भवान् वणिजः पुत्रः। वाणिज्यं तु परम्परया अनुवर्तेत। किन्तु दौर्भाग्यवशात् भवान् सर्वथा निर्धनः। एतस्मिन् एव नगरे धनगुप्तः नाम कोट्यधीशः अस्ति। निर्धनानां वणिपुत्राणां साहाय्यं करोति सः इति श्रूयते। अतः भवान् तं दृष्ट्वा वाणिज्यार्थं किञ्चित् मूलधनं प्रार्थयतु" इति।

मातुः सूचनाम् अङ्गीकुर्वन् वणिक्पुत्रः धनंगुप्तं द्रष्टुं निर्गतः। यदा सः धनगुप्तस्य समीपं गतः तदा धनगुप्तः अन्यं कञ्चित् युवकं तर्जयन् आसीत्—"वाणिज्यदक्षता किञ्चित् अपि भवति न दृश्यते। बहुवारं मया धनसाहाय्यं कृतम्। तस्य आधारेण लाभप्राप्तिः दूरे तिष्ठतु, मूलधनम् अपि व्ययीकृत्य आगतं भवता। यदि बुद्धिमत्ता स्यात् तर्हि कश्चित् मृतं मूषकम् अपि मूलधनत्वेन उपयुज्य लक्षशः रूप्यकाणि सम्पादयितुम् अर्हति" इति।

एतत्सर्वं दूरात् सम्यक् श्रुतवान् वणिपुत्रः। सः पुनः अग्रे न गतवान्। तत्रैव समीपे पतितः मृतः कश्चन मूषकः दृष्टः तेन। तं मृतमूषकं स्वीकृत्य ततः निर्गतवान् सः। समीपे एव कस्यचित् आपणस्य पुरतः कश्चन दुर्बलः मार्जारः तेन दृष्टः। वणिपुत्रः तस्मै तं मृतं मूषकं दत्तवान्। तस्य खादनेन मार्जारः सन्तुष्टः जातः। वणिपुत्रस्य प्राणिदयया सन्तुष्टः सः आपणिकः चणकान् दत्तवान्। वणिपुत्रः तान् भर्जयित्वा उपस्करं योजितवान्। अनन्तरं शीतलं जलम् अपि स्वीकृत्य नगरात् बहिः मार्गस्य पार्श्वे छायायुक्तस्य वृक्षस्य अधः उपविष्टवान्।

ग्रीष्मकालः सः। मध्याह्ने घोरः आतपः। काष्ठसङ्ग्रहं कृत्वा अरण्यतः आगच्छन्तः काष्ठविक्रेतारः तस्य वृक्षस्य अधः विश्रान्त्यर्थम् उपविशन्ति स्म। वणिपुत्रः तेभ्यः उपस्करयुक्तान् चणकान्, शीतलं जलं च दत्तवान्। एतेन सन्तुष्टेषु तेषु काष्ठविक्रेतृषु एकैकः अपि वणिपुत्राय द्वित्राणि काष्ठानि दत्त्वा गतवान्।

कमला आसक्त्या शाटिकाः पश्यन्ती परीक्षमाणा आसीत्। वरदराजः तासु शाटिकासु काञ्चित् उन्नीय तस्यै प्रदर्शयन्— "वत्से, एतां शाटिकां क्रीणातु। एषा शाटिका धृता चेत् भवती रतिः इव शोभते। अनन्तरं किं, कश्चन मन्मथः भवतीं नयेत् एव" इति सविनोदम् उक्तवान्।

लज्जां कृतककोपं च प्रदर्शयन्ती कमला शाटिकां सम्यक् परिशीलितवती। शाटिका तस्यै नितराम् अरोचत। सा वरदराजम् उक्तवती—"एषा शाटिका मह्यम् अरोचत। किन्तु एतदनुगुणं चोलवस्त्रं न आनीतं वा भवता?" इति।

तदा वरदराजः—"चोलवस्त्रं वेमनि एव अस्ति वत्से। सप्ताहाभ्यन्तरे सज्जीकृत्य आनेष्यामि। भवती चिन्तां मा करोतु" इति उक्त्वा शाटिकायाः मूल्यं स्वीकृत्य ततः निर्गतवान्।

ततः तेन श्रीपुरं प्रति गतम्। तत्र गुरुराजस्य पुत्र्यैः सरलायै अपि वरदराजेन दत्ता शाटिका नितराम् अरोचत। किन्तु सा अपि उक्तवती—"अनुरूपं चोलवस्त्रं न आनीतं भवता" इति।

"सज्जीक्रियमाणम् अस्ति तत्। सप्ताहाभ्यन्तरे अनुरूपं चोलवस्त्रम् आनेष्यामि। चोलवस्त्रं दृष्ट्वा भवती आश्चर्यचकिता यथा भवेत् तथा सज्जीक्रियमाणम् अस्ति। अतः तदभ्यन्तरे भवती अन्यतः चोलवस्त्रं मा क्रीणातु" इति उक्त्वा शाटिकायाः मूल्यं स्वीकृत्य गृहं प्रत्यागतवान् वरदराजः।

सप्ताहद्वयस्य अनन्तरं चोलवस्त्रं स्वीकृत्य कमलायाः गृहं गतवान् वरदराजः। "पुत्रि! अनुरूपं चोलवस्त्रम् आंनीतवान् अस्मि, पश्यतु" इति वदन् एकं चोलवस्त्रं प्रदर्शितवान् च।

तदा कमला—"एतत् मास्तु मह्यम्। मया अन्यतः अनुरूपं चोलवस्त्रं क्रीतम्" इति उक्तवती।

"अस्तु तर्हि" इति उक्त्वा ततः निर्गतः वरदराजः सरलायाः गृहं गतवान्। तं दूरात् एव दृष्ट्वा पृष्टवती सरला—"अविस्मृत्य चोलवस्त्रम् आनीतं खलु भवता?" इति।

"आम्, आम्। किन्तु आनयने अल्पः विलम्बः जातः" इति वदन् चोलवस्त्रं प्रदर्शयितुम् उद्युक्तः वरदराजः।

तदा सरला हसन्ती—"भोः महाशय! यथा यथा भवतः वयः प्रवर्धते तथा तथा विस्मरणशीलता अपि प्रवर्धते इति भावयामि। दशभ्यः दिनेभ्यः पूर्वं भवता शाटिका दत्ता खलु? भवतः गमनस्य अनन्तरम् अहं शाटिकां प्रसारितवती। तस्य अन्तः उत्तमं चोलवस्त्रम् आसीत्। वणिजः भवतः एवं विस्मरणं चेत् वाणिज्यस्य का गतिः?" इति वदन्ती अन्तः गत्वा तत् चोलवस्त्रम् आनीय प्रदर्श्य पुनः उक्तवती— "तस्मिन् दिने मया शाटिकायाः मूल्यं केवलं दत्तम्। चोलवस्त्रस्य मूल्यं कियत् इति अद्य स्वीकरोतु" इति।

तदा वरदराजः हसन्—"वत्से! अन्वर्थं नाम भवत्याः। व्यवहारे अल्पा अपि कपटता नास्ति। दीर्घसुमङ्गली भवतु भवती। रूपेण मन्मथः कश्चित् अचिरात् एव भवतीं परिणयतु। चोलवस्त्रस्य मूल्यं न स्वीकरोमि। भवत्याः भाविविवाहस्य निमित्तं मम उपायनम् एतत् इति भावयतु" इति उक्त्वा, तया सानुरोधं दीयमानम् अपि धनं विनयेन तिरस्कृत्य गृहं प्रत्यागतवान्। धर्मेन्द्रं प्रवृत्तं सर्वं निवेदितवान् च।

तदा धर्मेन्द्रः उक्तवान्—"मम परीक्षायां सरला एव उत्तीर्णा अभवत्। कमलायै दत्तायां शाटिकायाम् अपि चोलवस्त्रं स्थापितम् आसीत् एव। सा तत् स्वसमीपे स्थापयित्वा 'मया अन्यतः

"कोपः किमर्थं मम? नितरां सन्तुष्टः अस्मि इदानीम्। अपूर्वम् उपायनं प्राप्यते इत्यनेन तु द्विगुणितः सन्तोषः मम" इति हसन् उक्तवान् राजा।

राज्ञी प्रवृत्तं समग्रं विस्तरेण निवेद्य— "राज्ञी सती अहं वयनकार्ये उद्युक्ता यत् तदर्थं खिन्नः भवान् माम् एतस्मात् प्रयत्नात् निवारयेत् इति आलोच्य सर्वं रहसि एव कृतवती" इति उक्तवती राज्ञी।

"भवत्यै यत् यथा रोचते, तत् तथा करोतु। भवत्याः सन्तोषार्थम् अहं सर्वस्वम् अपि त्यक्तुं सिद्धः एव। एवं स्थिते अल्पेन केनचित् कार्येण यदि भवत्याः सन्तोषः स्यात् तर्हि तत् ममापि अनुमतम् एव" इति उक्तवान् राजा।

"प्रभो, मम अन्या काचित् अपेक्षा अस्ति। पूरयिष्यति वा भवान्?" इति पृष्टवती राज्ञी।

"अवश्यं पूरयिष्यामि। का सा अपेक्षा इति वदतु तावत्" इति उक्तवान् राजा।

"पिप्पलीवनम् एव निर्मातव्यम् इति मम इच्छा। तस्मिन् वने सहस्राधिकाः पिप्पलीवृक्षाः स्युः" इति निवेदितवती राज्ञी।

"एतावदेव खलु? अद्यैव कार्यस्य आरम्भं कारयिष्यामि। इष्टं सिद्धं भावयतु भवती" इति उक्तवान् राजा।

एवं प्रपञ्चे सर्वप्रथमं कौशेयवस्त्रं निर्मितवती आसीत् राज्ञी चीलिंग्षी। एतदनन्तरकाले चीनादेशीयाः राज्ञ्यः चीलिंग्षीस्थापितं सम्प्रदायम् अनुसरन्त्यः वर्षे एकस्मिन् दिने कैशेयकीटैः आहारं खादयन्ति स्म।

कालान्तरे कौशेयवस्त्राणि अन्येषु देशेषु अपि प्रसृतानि। चीनादेशे एतत् वस्त्रं सर्वप्रथमं निर्मितम् इत्यतः उत्तमस्य कौशेयवस्त्रस्य 'चीनांशुकम्' इत्यपि नाम। यद्यपि अन्येषु अपि देशेषु कौशेयवस्त्राणि निर्मीयन्ते तथापि चीनादेशे निर्मितानां कौशेयवस्त्राणां प्रसिद्धिः वैशिष्ट्यं च अद्यापि अक्षतं तिष्ठति।

कोपोपशमनम्भगिनी

कमलेशः कोपशीलः। अल्पस्य कारणस्य निमित्तम् अपि सः कुपितः भवति। सः शान्तिनामिकां कन्यां परिणीतवान्। यदा सा ऐदम्प्राथम्येन पतिगृहम् आगता तदा सर्वे ताम् उक्तवन्तः यत् सर्वप्रथमं दक्षिणपादम् अन्तः स्थापयन्ती प्रवेशं करोतु इति। किन्तु प्रवेशसमये सा प्रमादवशात् वामपादं प्रथमं स्थापयितुम् उद्युक्ता।

एतत् दृष्ट्वा नितरां क्रुद्धः कमलेशः पत्न्याः हस्तं गृहीत्वा बलात् आकृष्य— "एतावन्तः जनाः वदन्तः सन्ति चेदपि न श्रुतं वा भवत्या? वामपादं स्थापयितुम् उद्युक्ता खलु? बुद्धिः अस्ति वा भवत्याः?" इत्येवंरूपेण सम्यक् तर्जितवान्।

एवं शान्ता पत्युः कोपस्य प्रथमं परिचयं प्राप्तवती। द्वित्रेषु दिनेषु एव तया ज्ञातं यत् पतिः शीघ्रकोपी इति। गृहे स्थितेषु पात्रेषु तत्र तत्र असमता वक्रता च दृश्यते स्म। भित्तिषु अपि तत्र तत्र वर्णापगमः, मृत्तिक्रापगमः, लघुगर्ताः च दृश्यन्ते स्म। काष्ठमयेषु द्वारेषु अपि घट्टनचिह्नानि दृश्यन्ते स्म।

कदाचित् शान्ता एतादृशानि घट्टनचिह्नानि कुतूहलेन परिशीलयन्ती आसीत्। तदा तत्र आगता श्वश्रूः उक्तवती—"यदा यदा पाके अरुचिः अनुभूता तदा भवत्याः पतिमहोदयेन स्थालिका-दर्व्यादयः क्षिप्ताः। अतः एतानि घट्टनचिह्नानि जातानि" इति।

एतानि वचनानि श्रुत्वा षड्वर्षीया तस्याः ननान्दा उच्चैः हसितवती। किन्तु शान्ता न हसितवती। पत्युः कोपः कथञ्चित् निवारणीयः एव इति शान्तायाः इच्छा। अतः सा मृदुभिः वचनैः एव पतिं बोधितवती। कमलेशः सर्वं विना विरोधं श्रुतवान्, किन्तु परिणामः तु शून्यः एव।

शान्ता उपायचतुरा। बोधनेन विरोधेन वा किमपि प्रयोजनं न भवति इति ज्ञातवती सा। 'पत्युः स्वभावस्य परिवर्तनार्थं कोऽपि उपायः चिन्तनीयः' इति निश्चितवती सा।

'यदा कोपः आगच्छति तदा कमलेशः कटूनि वचनानि वदति स्म। तेन यथा व्यवह्रियते तथैव व्यवहृत्य तस्य कोपः निवारणीयः' इति चिन्तनं कृतवती शान्ता।

कदाचित् कुतश्चित् आगतः कमलेशः गृहस्य अन्तः आगत्य महता कोपेन—"रे, अविलम्बेन गन्तव्यम् अस्ति मया। त्वरया कवलमितम् अन्नम् आनयतु" इति पत्नीम् उक्तवान्।

शान्ता पत्या यथा उक्तं तथैव कवलमितम् अन्नम् आनीय पत्युः पुरतः स्थापितवती। पत्न्याः एतादृशं व्यवहारं दृष्ट्वा आश्चर्यम् अनुभवन् कमलेशः तीक्ष्णया दृष्ट्या पत्नीं दृष्टवान्। शान्ता एतत् अविगणयन्ती स्वगतम् इव उक्तवती— "कवलपरिमितेन अन्नेन बुभुक्षा शाम्यति इति मया कथादिषु श्रुतम् आसीत्। किन्तु व्यवहारे अपि तथा भवति इति अद्य मया ज्ञातम्। आश्चर्यकरम् एतत्" इति।

पत्नी बुद्ध्या एवं कुर्वती अस्ति इति चिन्तितवान् आसीत् कमलेशः। तस्याः वचनात् तेन भावितं यत् पत्नी मौग्ध्येन एवं कुर्वती अस्ति इति। 'आकारेण यथा अस्ति तथा नास्ति एषा। मुग्धा मन्दमतिः च एषा' इति चिन्तितवान् सः। एवं चिन्तयतः तस्य कोपस्य तीव्रता अपगता आसीत्।

एवं त्रिचतुर्वारं प्रवृत्तम्। पुनः अन्यस्मिन् दिने कमलेशः महता कोपेन गृहं प्रविष्टवान्। शान्ता पाकशालायां कार्ये मग्ना आसीत्। पत्नीम् आह्वयन् बहिस्तात् एव कोपेन उक्तवान् कमलेशः—"अये, आपणतः वस्तूनि आनेतव्यानि खलु? स्यूतं धनं च अत्र क्षिपतु तावत्" इति।

शान्ता स्यूतं धनं च आनीय कमलेशम् उद्दिश्य क्षिप्तवती। "अये, किम् एतत्?" इति कोपेन पृष्टवान् कमलेशः।

"अहं किं जानामि? भवता यथा उक्तं तथा कृतं मया। पत्युः वचनम् अक्षरशः पालनीयम् इति मातापितृभ्याम् अहं बोधिता अस्मि। वस्तूनाम् आनयनसन्दर्भे स्यूतस्य धनस्य च क्षेपणम् एतस्य गृहस्य सम्प्रदायः स्यात् इति चिन्तितं मया। अतः एव भवता यथा उक्तं तथा कृतम्" इति उक्तवती शान्ता। एतस्य प्रतिवचनं किं वक्तव्यम् इति अजानन् कमलेशः मौनं स्थितवान्।

पुनः कदाचित् गृहसदस्याः सर्वे बन्धुविवाहनिमित्तं पार्श्वग्रामं गतवन्तः आसन्। गृहे शान्ता कमलेशः च आस्ताम्। पाकशालासमीपे स्थापितं तण्डुलोदकपात्रं पूर्णम् आसीत्। अनतिदूरे वृक्षस्य अधः धेन्वाः पुरतः स्थापिते पात्रे तत् स्थापयितुं शान्ता नीतवती। किन्तु धेन्वा पूर्वदिने स्थापितं तण्डुलोदकम् एव न पीतम् आसीत्। अतः तत् पात्रं रिक्तं न आसीत्। शान्ता तण्डुलोदकं क्षेप्तुं न

वधूपरीक्षाविवेकः

रामपुरे पूर्वं धर्मेन्द्रः नाम कश्चन धनिकः निवसति स्म। धर्मेन्द्रस्य अन्वर्थं नाम। कदापि अन्याय्यं व्यवहारं न करोति सः। अतः उत्तमा कीर्तिः प्राप्ता आसीत् तेन। धर्मेन्द्रस्य एकमात्रपुत्रः विश्वनाथः। सः रूपवान् गुणवान् च। यदा पुत्रः प्राप्तवयस्कः जातः तदा धर्मेन्द्रः चिन्तितवान् यत् अस्मत्कुलयोग्या रूपवती गुणवती च वधूः आनेतव्या इति।

रामपुरे वरदराजः नाम तन्तुवायः आसीत्। वरदराजस्य धर्मेन्द्रस्य च आत्मीयः सम्बन्धः। वरदराजः उत्तमाः शाटिकाः निर्माय समीपस्थेषु ग्रामेषु विक्रयणं करोति। अतः बहूनां धनिकगृहाणां परचियः अस्ति तस्य। धर्मेन्द्रः कन्यान्वेषणप्रयत्नं, तद्विषये स्वस्य आशयं च वरदराजं निवेदितवान्।

वरदराजः क्षणकालम् आलोच्य उक्तवान्—"मित्र! बहूनां धनिकगृहाणां परिचयः अस्ति मम। शाटिकाविक्रयणसन्दर्भे धनिकपुत्र्यः अपि सहजतया दृश्यन्ते मया। पाण्डवपुरस्य मानधनस्य पुत्री कमला सुन्दरी। एवम् एव श्रीपुरस्य गुरुराजस्य पुत्री सरला अपि सुन्दरी। मानधनः गुरुराजश्चं कुलेन धनेन च भवत्समानौ। अतः कमला-सरलयोः अन्यतरा भवतः स्नुषा भवितुम् अर्हति" इति।

वरदराजस्य कथनस्य अनुगुणं धर्मेन्द्रः विश्वनाथः च पाण्डवपुरं श्रीपुरं च गत्वा कमलां सरलां च दृष्ट्वा आगतवन्तौः।

कमला सरला च रूपेण अद्वितीये एव। दर्शनमात्रेण तयोः स्वभावादिकं तु न ज्ञायते। अतः विश्वनाथः पितरम् उक्तवान्— "एतयोः याङ्काञ्चित् अपि परिणेतुम् अहं सिद्धः। अस्मत्कुलोचिता का इति अनुभवी ज्येष्ठः भवान् एव निर्णयतु" इति।

धर्मेन्द्रः किमपि चिन्तयित्वा वरदराजस्य गृहं गत्वा उक्तवान्—"मित्रः भवता सूचिते उभे अपि सुन्दर्यौ एव। किन्तु सौदर्येण केवलेन किं प्रयोजनम्? स्वभावः अपि अस्माभिः परीक्षणीयः। एतयोः स्वभावस्य ज्ञानार्थम् अहं काञ्चित् परीक्षां चिन्तितवान् अस्मि। एतदर्थं भवतः साहाय्यम् अत्यावश्यकम्" इति।

तदा वरदराजः हसन्—"विश्वनाथस्य विवाहे ममापि विशेषासक्तिः अस्ति एव। अतः भवता यथा उच्यते तथा कर्तुं सिद्धः अहम्। मया किं करणीयम् इति वदतु तावत्" इति उक्तवान्।

धर्मेन्द्रः स्वमनसि स्थितां योजनां विस्तरेण निवेद्य वरदराजेन किं करणीयम् इति सूचितवान्।

धर्मेन्द्रस्य योजनां ज्ञात्वा वरदराजः सन्तोषं प्रकटयन्—"उत्तमा योजना कृता भवता। का कीदृशी इति ज्ञातुम् एषः योग्यः उपायः" इति उक्तवान्।

धर्मेन्द्रस्य सूचनायाः अनुगुणं वरदराजः नूतनविन्यासयुक्ताः काश्चन शाटिकाः स्वीकृत्य पाण्डवपुरं गतवान्। मानधनस्य पुत्री कमला वरदराजं सम्यक् जानाति एव। सा वरदराजं पृष्टवती —"नूतनविन्यासयुक्ताः शाटिकाः आनीताः वा भवता?" इति।

"आं पुत्रि! नूतनाः विन्यासाः यदा रच्यन्ते तदा सर्वप्रथमं भवत्यै एव खलु प्रदर्शयामि?" इति वदन् शिरसि स्थापितं शाटिकाग्रन्थिम् अवतार्य शाटिकाः प्रसारितवान् वरदराजः।

रमानन्दः एकान्ते पत्नीम् अङ्गुलीयकम्य प्राप्तेः वार्ताम् वैशिष्ट्यं च उक्तवान्।

अनन्तरदिने रमानन्दः स्वग्रामं गन्तुम् उद्युक्तः। तदा महेशस्य पिता रमानन्द-समीपम् आगत्य उक्तवान्—"श्रीमन्! मम पुत्र्याः विवाहः निश्चितः। किन्तु धनं मम समीपे पर्याप्तं नास्ति। भवान् यदि त्रिसहस्रं रूप्यकाणि दद्यात् तर्हि मम पुत्र्याः विवाहः निर्विघ्नं प्रचलेत्" इति।

"धनम् आवश्यकं वा? तर्हि ग्रामप्रमुखस्य सम्मुखे भवान् ऋणपत्रं लिखित्वा ददातु। अहं भवता मह आगमिष्यामि" इति उक्तवान् रमानन्दः।

"ऋणपत्रम्? एतस्य तात्पर्यं सिध्यति यत् भवान् धनमाहाय्यं कर्तुं न सिद्धः, ऋणरूपेण चेत् दातुं सिद्धः इति। एवं ननु?" इति आश्चर्येण पृष्टवान् महेशस्य पिता।

"आम्। अहं मम बान्धवान् भिक्षुकान् कर्तुं न इच्छामि। ये अन्यान् याचन्ते ते भिक्षुकाः एव इति मम आशयः" इति उक्तवान् रमानन्दः।

"अस्तु तावत्, ऋणरूपेण एव भवान् मह्यं धनं ददातु। किन्तु बान्धवानां मध्ये ऋणपत्रस्य प्रस्तावः किमर्थम्?" इति पृष्टवान् महेशस्य पिता।

"भवान् कस्मैचित् ऋणपत्रं विनैव ऋणं ददातु। तदा धनस्य प्रतिप्राप्त्यर्थं कीदृशं कष्टम् अनुभूयते इति स्वयं ज्ञायते" इति उक्तवान् रमानन्दः।

महेशस्य पिता किमपि अवदन् मौनं स्थितवान्। रमानन्दसकाशात् तेन ऋणं न स्वीकृतम्।

प्रतिगमनसमये रमानन्दः तस्यैव वृक्षस्य अधः विश्रान्त्यर्थम् उपविष्टवान्, यस्य च अधः गमनसमये उपविष्टम् आसीत्। पुत्राणां निद्रायाः अनन्तरं पत्नी रमानन्दं पृष्टवती— "अन्येषां साहाय्यं कुर्वन् भवान् बान्धवस्य महेशस्य पितुः साहाय्यं किमर्थं निराकृतवान्?" इति।

"मम समीपे धनम् अस्ति इति जानन् महेशस्य पिता धनं प्रार्थितवान्। वस्तुतः तु धनस्य आवश्यकता नास्ति तस्य। अतः एव ऋणपत्रस्य प्रस्तावः यदा आगतः तदा सः मौनम् आश्रितवान्। यस्य महती आवश्यकता, सः ऋणपत्रं लिखित्वा दातुं सिद्धः भवेत् एव। अपरिचिताः तु अनिवार्यतायां सत्याम् एव धनं प्रार्थयन्ते। अपरिचितेषु अपि वञ्चकाः भवेयुः नाम। अतः एव परीक्ष्य पात्रत्वं निर्णीय धनं दातव्यम्। मित्राणि बान्धवाः वा धनं प्रार्थयन्ते चेत् ऋणपत्रं विना धनं न दातव्यम्। अनुभवात् मया अवगतः अंशः एषः" इति उक्तवान् रमानन्दः।

अनन्तरं रमानन्दः तत्पत्नी च निद्रामग्नौ जातौ। रमानन्दस्य स्वप्ने सः संन्यासी पुनः आगत्य—"कमलपुरे भवता बन्धुः सम्यक् एव अभिज्ञातः। धनदानविषये इदानीं भवता या धारणा आश्रिता सा नितरां श्लाघ्या। अपात्रे दत्तं धनं सर्वथा निष्फलम्। इतः परम् अपि पात्रे दानं कुर्वन् भवान् सुखेन जीवतु। यावत् भवान् निष्कल्मषहृदयः भवति तावत् दारिद्र्यं भवन्तं न पीडयति" इति उक्त्वा अदृश्यतां गतवान्।

विश्रान्तिं समाप्य रमानन्दः पत्नीपुत्रैः सह स्वग्रामं प्रत्यागतवान्। इदानीं सः बुद्धिमत्तया पात्रापात्रतां निर्णीय दानं करोति। अतः एव वञ्चकाः तस्य समीपं गन्तुं भीतिम् अनुभवन्ति। निर्धनाः तु निस्सङ्कोचं गत्वा धनं प्राप्नुवन्ति। सत्कीर्तिं प्राप्य परोपकारनिरतः सन् चिरकालं सुखेन जीवितवान् रमानन्दः।

इच्छति। निम्बवृक्षस्य अधः योगासनं कुर्वन्तं पतिं पृष्टवती सा—"धेन्वा ह्यस्तनं तण्डुलोदकम् एव न पीतम्। अतः अद्यतनं तण्डुलोदकं किं करोमि?" इति।

पद्मासने उपविष्टः कमलेशः पत्नीं तीक्ष्णया दृष्ट्या पश्यन् कोपेन—"मम शिरसि पातयतु तर्हि" इति उक्तवान्।

शान्ता तत्क्षणे एव तण्डलोदकं कमलेशस्य उपरि पातितवती एव। पत्नीम् आश्चर्येण क्रोधेन च पश्यन् उत्थितः कमलेशः तां कपोले ताडितवान्।

अनन्तरं क्रोधेन ताम् उक्तवान् सः—"किम् इदं कृतं भवत्या? एतस्मिन् वयसि अपि किं करणीयं किं न करणीयम् इति विवेकः नास्ति खलु भवत्याः" इति।

शान्ता अश्रूणि स्रावयन्ती—"भवता यथा उक्तं तथा कृतं मया। तण्डुलोदकस्नानम् आरोग्याय इति भावयन् भवान् तथा उक्तवान् स्यात् इति चिन्तयित्वा अहम् एवं कृतवती। यदि एतत् अनुचितं तर्हि विवेकिना भवता किमर्थम् उक्तम्?" इति उक्तवती।

एतत् श्रुत्वा चिन्ताक्रान्तः सन् कमलेशः हस्ताभ्यां शिरः गृहीत्वा उपविष्टवान्। शान्ता प्रोञ्छम् आनीय पत्युः शरीरं मार्जयन्ती "मया कृतं यदि अनुचितं तर्हि अहं क्षन्तव्या" इति प्रार्थितवती।

मौनम् उपविष्टः कमलेशः पत्न्याः मौग्ध्यविषये चिन्तयन् अस्ति। पूर्वं प्रवृत्ताः घटनाः तेन स्मृताः। 'एतासु घटनासु मम कोपस्य अपि पात्रम् आसीत्। मम कोपः एव एतादृशघटनानां मूलम्' इति ज्ञातवान् सः।

एतेन कमलेशे विवेकः जागरितः अभवत्। यदा कोपप्रसङ्गः आगच्छति तदा पूर्वतनघटनाः स्मरन् सः झटिति कोपम् उपसंहरति। शान्ततया स्थातुं बहुधा प्रयत्नं करोति सः।

शान्तया अपि पत्युः एषः प्रयत्नः लक्षितः एव। सा पत्युः अनुकूलतया व्यवहरन्ती खेदप्रसङ्गः यथा न उद्भवेत् तथा व्यवहरति। कालान्तरे कमलेशस्य कोपः सर्वथा शान्तः। सः शान्तः विवेकी च जातः।

सत्पात्रे दानं श्रेयसेश्रीमाता

मधुपुरनामके ग्रामे रमानन्दः नाम कश्चन दानशीलः निवसति स्म। सः धनिककुले जातः आसीत्। किन्तु पात्रापात्रताम् अविचार्य यथेच्छं दानं निरन्तरं कृतम् इत्यतः सः निर्धनः जातः आसीत्। तस्य बान्धवाः एव तस्मात् प्रभूतं धनं दानरूपेण प्राप्तवन्तः आसन्। रमानन्दस्य इदानीन्तनाम् अवस्थां ते बान्धवाः सर्वे अपि जानन्ति स्म एव। तथापि ते साहाय्यार्थम् अग्रे न आगतवन्तः। प्रत्युत ते रमानन्दविषये अपप्रचारं कृतवन्तः।

केचन बान्धवाः उक्तवन्तः यत् महादाता इति कीर्तिः प्राप्तव्या इति उद्देशेन रमानन्देन फलम् अविचिन्त्य बहुधा दानं कृतम्, अतः एषा स्थितिः इति।

अन्ये केचन उक्तवन्तः यत् रमानन्देन अन्याय्येन वञ्चनादिना च धनं सम्पादितम् आसीत्, अतः एषा गतिः इति।

इतरे केचन उक्तवन्तः यत् रमानन्दस्य मनः दुर्गुणयुक्तम् अस्ति, अतः अधःपतनं जातम् इति। 'रमानन्दस्य साहाय्यं यः करोति सः अपि दुर्गतिं प्राप्स्यति' इत्यपि वदन्ति स्म ते।

रमानन्दस्य आत्मीयेष केचन साहाय्यं कर्तुम् इच्छन्ति स्म। किन्तु रमानन्दबान्धवानां दुष्प्रचारं श्रुत्वा ते निरुत्साहं प्राप्य अग्रे न गतवन्तः एव।

एतादृश्यां स्थितौ एतस्मिन् ग्रामे स्थितिः अनुचिता इति आलोच्य रमानन्दः दूरस्थं ग्रामं प्रति पत्नीपुत्रादिभिः सह प्रस्थितवान्। प्रयाणे ते सर्वे कुत्रचित् वृक्षस्य अधः विश्रान्त्यर्थम् उपविष्टवन्तः। बालाः अल्पेन एव कालेन निद्रावशं गताः।

पत्नी खेदेन रमानन्दं उक्तवती—“वयं बान्धवानां विशेषसाहाय्यं कृतवन्तः। कस्यापि अपकारः न कृतः अस्माभिः। तथापि बान्धवाः एवं दुष्प्रचारं किमर्थं कुर्वन्ति इति न ज्ञायते” इति।

तदा रमानन्दः हसन् उक्तवान्—“एतस्यां दुःस्थित्यां बान्धवैः साहाय्यं करणीयम् इति भवती अपेक्षते। किन्तु बान्धवाः—‘एतत् दायित्वम् अस्माकम् उपरि आपतेत्’ इति भावयन्तः अपप्रचारं कुर्वन्तः सन्ति। ते अस्मत्तः स्वीकरणं केवलम् इच्छन्ति, न तु अस्माकं साहाय्यम्। अतः एतादृशानां कृतघ्नानां विषये चिन्तनम् अपि पापाय। इदानीं भवती चिन्तां परित्यज्य सुखेन निद्रां करोतु” इति।

दीर्घं निःश्वसती रमानन्दपत्नी अल्पे एव काले निद्रां प्राप्तवती। रमानन्दः अपि निद्रां प्राप्तवान्।

निद्रावस्थायां तेन स्वप्ने कश्चन संन्यासी दृष्टः। तेन संन्यासिना उक्तम्—“भोः, पात्रापात्रताम् अविचार्य भवता यत् दानं कृतं तेन भवता एतादृशी गतिः प्राप्ता। किन्तु भवता सम्पादितं पुण्यं तु व्यर्थं न। तच्च ताम्राङ्गुलीयकरूपेण एतस्य वृक्षस्य कोटरे पतितम् अस्ति। तत् अन्विष्य धरतु भवान्। अङ्गुलीयकं धरता भवता सर्वप्रथमम् एकं कार्यं करणीयम्। अङ्गुलीयकं धृत्वा इतः अनीतदूरे स्थितं कमलपुरं गच्छतु भवान्। तत्र वृक्षमूले जल्पन्तः केचन दृश्यन्ते। तेषु अन्यतमः भवतः बन्धुः भवति। विना प्रश्नं भवान् तं बन्धुं ज्ञातुं शक्नोति चेत् भवतः एतत् ताम्रमयम् अङ्गुलीयकं सुवर्णमयं भविष्यति। भवदिच्छानुगुणम् अपेक्षितं धनं दास्यति च। यावत् भवान् जानन् अपि अपात्रे दानं न कुर्यात् तावत् एतत् सुवर्णमयं स्थास्यति, धनं दास्यति च। तत् ताम्रमयं यदा भविष्यति तदा भवता ज्ञातव्यं यत् अङ्गुलीयकस्य माहात्म्यं समाप्तम् इति। स्वबन्धुगृहे एकं दिनं यावत् केवलं स्थित्वा स्वग्रामः प्रत्यागन्तव्यः” इति।

आश्चर्यम् अनुभवन् रमानन्दः उत्थितवान्। वृक्षकोटरे अन्विष्टवान् च। तत्र ताम्राङ्गुलीयकं प्राप्तं तेन। तदीयायाम् अङ्गुल्यां सम्यक् स्थितं तत्।

रमानन्दः पत्नीं पुत्रान् च उत्थाप्य कमलपुरं प्रति गतवान्। अन्धकारप्रसारात् पूर्वम् एव ते कमलपुरं प्राप्तवन्तः। ग्रामस्य आरम्भे एव केचन वार्तालापं कुर्वन्तः उपविष्टाः तैः दृष्टाः। आश्चर्यं नाम ते रमानन्दस्य विषये एव वार्तालापं कुर्वन्तः आसन्।

“मम पिता पूर्वं कदाचित् मधुपुरं गतः अकस्मात् तीव्रम् अस्वस्थः जातः। परिचिताः अपरिचिताः इव व्यवहृतवन्तः। तदा कश्चित् दयया मम पितरं चिकित्सालयं नीतवान्। वैद्येन चिकित्सार्थं प्रभूतं धनं पृष्टम्। तत्समये रमानन्देन एव धनसाहाय्यं कृतम्। प्रतिस्वीकरणं निराकृतं च। मया एतत्सर्वं मम पितुः मुखात् श्रुतम्। तादृशः रमानन्दः इदानीं निर्धनः सन् स्वग्रामात् निर्गतः इति श्रूयते। सज्जनानां निवासार्थं न अयं कालः” इति खेदेन उक्तवान् कश्चित्।

“मम पिता बाल्ये एव मातापितृविहीनः बन्धुभिः वञ्चितः च जातः आसीत्। तथापि तारुण्ये उत्साहेन वाणिज्यम् आरब्धवान् आसीत्। किन्तु अनुभवराहित्यात् कर्मकराणां वञ्चनया च मम पिता

ऋणकूपे पतितः। तदा अन्येन बोधितः मम पिता रमानन्दं साहाय्यं प्रार्थितवान्। रमानन्दः तु अल्पाम् अपि उपेक्षाम् अप्रदर्शयन् धनसाहाय्यं कृतवान्” इति उक्तवान् अपरः।

एवं तेषु उपस्थितेषु एकैकः अपि पूर्वं प्रवृत्तां घटनाम् उदाहरन् रमानन्दस्य प्रशंसां करोति स्म।

किन्तु महेशः नाम कश्चित् एतद्विरुद्धम् अभिप्रायं प्रकटयन् उक्तवान्—“भवन्तः रमानन्दस्य पृष्ठभूमिकां न जानन्ति। तस्य पिता अन्याय्येन प्रभूतं धनं सम्पादितवान् आसीत्। अतः सः पापफलरूपेण आगतात् घोरव्याधितः प्राणान् त्यक्तवान्। स एव व्याधिः रमानन्दस्य पितरम् अपि अपीडयत्। तत्सन्दर्भे केनचित् संन्यासिना सूचितं यत् परम्पराप्राप्ता समग्रा सम्पत्तिः दानरूपेण दत्ता चेत् व्याधिः अपगच्छति इति। अतः एव रमानन्देन दानं कृतम्। किन्तु रमानन्दवंशे जातः कोऽपि परिश्रमेण जीवनं न जानाति। आयस्य अभावतः रमानन्दः निर्धनः जातः” इति।

तत्समये रमानन्दः साक्षात् महेशस्य समीपं गत्वा उक्तवान्—“वत्स! अहम् अस्मि रमानन्दः। मधुपरतः आगच्छन्तः स्मः वयम्। एतस्मिन् कमलपुरे कश्चित् बन्धुः स्यात् इति न तर्कितम् आसीत् मया। भवतः मुखदर्शनात् ज्ञातं यत् भवान् मम बन्धुः इति” इति।

आगतः रमानन्दः एव इति ज्ञात्वा तत्र उपस्थिताः सर्वे उत्थाय नमस्कृत्य— “श्रीमन्! भवद्विषये अस्माभिः बहुधा श्रुतम्। भवतः दर्शनात् नितरां सन्तुष्टाः वयम्। भवादृशः एवं दुर्दशां प्राप्तवान् इति श्रुत्वा खिन्नाः च। अस्माभिः इदानीं कीदृशं साहाय्यं करणीयम् इति सूचयतु कृपया” इति विनयेन उक्तवन्तः।

रमानन्दः तर्जन्या धृतम् अङ्गुलीयकं दृष्टवान्। तत् इदानीं ताम्रमयं नास्ति, अपि तु सुवर्णमयं दृश्यते।

सः मन्दहासपूर्वकं तान् जनान् उक्तवान्— “अहं कस्यापि साहाय्यं न इच्छामि। ये सत्कार्याणि कुर्वन्ति तान् कष्टानि न पीडयन्ति। भवत्सु कोऽपि मत्तः साहाय्यम् इच्छति चेत् वदतु। अहं यथाशक्ति साहाय्यं करिष्यामि” इति।

तदा तेषु कश्चित् उक्तवान्—“श्रीमन्! मया धनिकात् शतं रूप्यकाणि स्वीकृतानि आसन्। इदानीं वृद्धिभारः एव महान् जातः अस्ति। अतः मया पञ्चशतं रूप्यकाणि अपेक्ष्यन्ते। अचिरात् एव समग्रं धनं न प्रत्यर्पितं चेत् धनिकः मम भूमिं बलात्कारेण स्वायत्तीकरिष्यति” इति।

“भवान् सायं धनिकेन सह मम समीपम् आगच्छतु। तदा धनं दास्यामि। अद्य अहं महेशस्य गृहे स्थास्यामि” इति उक्तवान् रमानन्दः।

‘रमानन्दः पुनरपि धनिकः जातः स्यात्’ इति भावयन् तं नमस्कृत्य—“अद्य मम महत् सौभाग्यम्। आगच्छतु, गृहं गच्छाम तावत्” इति निवेदितवान् महेशः।

रमानन्दः पत्नीपुत्रैः सह महेशस्य गृहं गतवान्। सायं सः ग्रामीणः धनिकेन सह महेशस्य गृहम् आगतवान्। रमानन्दः तस्मै धनं दत्त्वा तं प्रेषितवान्। सुवर्णमयं तत् अङ्गुलीयकं यावत् आवश्यकं तावत् धनं ददाति स्म।

पत्युः औदार्यं दृष्ट्वा रमानन्दपत्नी आश्चर्यचकिता—‘यः धनाभावकारणतः ग्रामं परित्यज्य प्रस्थितः सः एव इदानीम् एवम् औदार्येण कथं दानं कुर्वन् अस्ति? कथम् एतेन धनं प्राप्तम्?’ इति।